# shrI rAmachandrAShTakam

# શ્રીરામચન્દ્રાષ્ટકમ્

## Document Information

Text title : rAmachandrAShTakam 1

File name : raamachandra8.itx

Category : aShTaka, raama

Location : doc_raama

Author : amaradAsa

Proofread by : Kirk Wortman kirkwort at hotmail.com

Latest update : January 13, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 19, 2022

*sanskritdocuments.org*

# શ્રીરામચન્દ્રાષ્ટકમ્

ૐ ચિદાકારો ધાતા પરમસુખદઃ પાવનતનુ-
  ર્મુનીન્દ્રૈર્યોગીન્દ્રૈર્યતિપતિસુરેન્દ્રૈર્હનુમતા ।
સદા સેવ્યઃ પૂર્ણો જનકતનયાઙ્ગઃ સુરગુરૂ
  રમાનાથો રામો રમતુ મમ ચિત્તે તુ સતતમ્ ॥ ૧॥

મુકુન્દો ગોવિન્દો જનકતનયાલાલિતપદઃ
  પદં પ્રાપ્તા યસ્યાધમકુલભવા ચાપિ શબરી ।
ગિરાતીતોઽગમ્યો વિમલધિષણૈર્વેદવચસા
  રમાનાથો રામો રમતુ મમ ચિત્તે તુ સતતમ્ ॥ ૨॥

ધરાધીશોઽધીશઃ સુરનરવરાણાં રઘુપતિઃ
  કિરીટી કેયૂરી કનકકપિશઃ શોભિતવપુઃ ।
સમાસીનઃ પીઠે રવિશતનિભે શાન્તમનસો
  રમાનાથો રામો રમતુ મમ ચિત્તે તુ સતતમ્ ॥ ૩॥

વરેણ્યઃ શારણ્યઃ કપિપતિસખશ્ચાન્તવિધુરો
  લલાટે કાશ્મીરો રુચિરગતિભઙ્ગઃ શશિમુખઃ ।
નરાકારો રામો યતિપતિનુતઃ સંસૃતિહરો
  રમાનાથો રામો રમતુ મમ ચિત્તે તુ સતતમ્ ॥ ૪॥

વિરૂપાક્ષઃ કાશ્યામુપદિશતિ યન્નામ શિવદં
  સહસ્રં યન્નામ્નાં પઠતિ ગિરિજા પ્રત્યુષસિ વૈ ।
સ્વર્લોકે ગાયન્તીશ્વરવિધિમુખા યસ્ય ચરિતં
  રમાનાથો રામો રમતુ મમ ચિત્તે તુ સતતમ્ ॥ ૫॥

પરો ધીરોઽધીરોઽસુરકુલભવશ્ચાસુરહરઃ
  પરાત્મા સર્વજ્ઞો નરસુરગણૈર્ગીતસુયશાઃ ।
અહલ્યાશાપઘ્નઃ શરકરઋજુઃકૌશિકસખો
  રમાનાથો રામો રમતુ મમ ચિત્તે તુ સતતમ્ ॥ ૬॥

હૃષીકેશઃ શૌરિર્ધરણિધરશાયી મધુરિપુ-
　　રુપેન્દ્રો વૈકુણ્ઠો ગજરિપુહરસ્તુષ્ટમનસા ।
બલિધ્વંસી વીરો દશરથસુતો નીતિનિપુણો
　　રમાનાથો રામો રમતુ મમ ચિત્તે તુ સતતમ્ ॥ ૭॥

કવિઃ સૌમિત્રીડ્યઃ કપટમૃગઘાતી વનચરો
　　રણશ્લાઘી દાન્તો ધરણિભરહર્તા સુરનુતઃ ।
અમાની માનજ્ઞો નિખિલજનપૂજ્યો હૃદિશયો
　　રમાનાથો રામો રમતુ મમ ચિત્તે તુ સતતમ્ ॥ ૮॥

ઇદં રામસ્તોત્રં વરમમરદાસેન રચિતમ્
　　ઉષઃકાલે ભક્ત્યા યદિ પઠતિ યો ભાવસહિતમ્ ।
મનુષ્યઃ સ ક્ષિપ્રં જનિમૃતિભયં તાપજનકં
　　પરિત્યજ્ય શ્રીષ્ઠં રઘુપતિપદં યાતિ શિવદમ્ ॥ ૯॥

॥ ઇતિ શ્રીમદ્રામદાસપૂજ્યપાદશિષ્યશ્રીમદ્-
　　હંસદાસશિષ્યેણામરદાસાખ્યકવિના વિરચિતં
　　શ્રીરામચન્દ્રાષ્ટકં સમાપ્તમ્ ॥

*shrI rAmachandrAShTakam*

pdf was typeset on November 19, 2022

Please send corrections to *sanskrit@cheerful.com*